कुण्डलं, क्ली, (कुण्ड्यते रक्ष्यते इति कुडि रक्षायां +वृषादित्वात् कलच्। यद्वा कुण्डं तदाकारं लाति गृह्णातीति। ला+कः।) स्वनामख्यात-कर्णभूषणम्। (यथा विष्णुध्याने।

"ध्येयः सदा सवितृमण्डलमध्यवर्त्ती
नारायणः सरसिजासनसन्निविष्टः
केयूरवान् कनककुण्डलवान् किरीटी" ॥)

तत्पर्य्यायः। कर्णवेष्टनम् २। इत्यमरः।२।६।१०३। पाशः। वलयः। इति मेदिनी। (पुं, कौरव्यकुलज-सर्पविशेषः। यथा महाभारते १।५७।१३।

"एरकः कुण्डलो वेणी वेणीस्कन्धः कुमारकः।
बाहुकः शृङ्गवेरश्च धूर्त्तकः प्रातरातकौ।
कौरव्यकुलजास्त्वेते प्रविष्टा हव्यवाहनम्" ॥

पुंलिङ्गेऽस्य रक्तकाञ्चनवाचकता उक्ता। यथा, वैद्यकरत्नमालायाम्।

"रक्तपुष्पः कोविदारो युग्मपत्रस्तु कुण्डलः" ॥)

कुण्डलिनी, स्त्री, (कुण्डलिन्+स्त्रियां ङीप्।) कुल-कुण्डलिनी शक्तिः। यथा,—

"ध्यायेत् कुण्डलिनीं सूक्ष्मां मूलाधारनिवासिनीम्।
तामिष्टदेवतारूपां सार्द्धत्रिवलयान्विताम्॥
कोटिसौदामिनीभासां स्वयम्भूलिङ्गवेष्टिनीम्।
तामुत्थाप्य महादेवीं प्राणमन्त्रेण साधकः॥
उद्यद्दिनकरोद्योतां यावच्छ्वासं दृढ़ासनः।
अशेषाशुभशान्त्यर्थं समाहितमनाश्चिरम्।
तत्प्रभापटलव्याप्तं शरीरमपि चिन्तयेत्" ॥

इति तन्त्रसारः॥ *॥

गुडूची। इति राजनिर्घण्टः॥ मिष्टान्नविशेषः। जिलिपी इति भाषा। तस्य पाकप्रकारो यथा।

"नूतनं घटमानीय तस्यान्तः कुशलो जनः।
प्रस्थार्द्धपरिमाणेन दध्यम्लेन प्रलेपयेत्॥
द्विप्रस्थां समितां तत्र दध्यम्लं प्रस्थसम्मितम्।
घृतमर्द्धशरावञ्च घोलयित्वा घटे क्षिपेत्॥
आतपे स्थापयेत्तावद्यावद्याति तदम्लताम्।
तां सुपक्वां घृतान्नीत्वा सितापाके तनुद्रवे॥
कर्पूरादिसुगन्धे च स्नपयित्वोद्धरेत्ततः" ॥

अस्या गुणाः।

"एषा कुण्डलिनी नाम्ना पुष्टिकान्तिबलप्रदा।
धातुवृद्धिकरी वृष्या रुच्या चेन्द्रियतर्पणी" ॥

इति भावप्रकाशः॥

कुण्डली, स्त्री, (कुण्डल+जातौ ङीष्।) मिष्टान्न-विशेषः। जिलिपी इति भाषा। इति पाकराजेश्वरः॥ *॥ कुलकुण्डलिनी शक्तिः। यथा,—

"त्रिकोणं तत्तु विज्ञेयं शक्तिपीठं मनोहरम्।
तदङ्कुरे कामवायुर्जीवरूपोऽतिचञ्चलः॥
अधोमुखस्तत्र लिङ्गः स्वयम्भुस्तेन चाल्यते॥
नीवारशूकवत्तन्वी कुण्डली परदेवता॥
शङ्खतुल्यनिभा देवी सार्द्धत्रिवलयान्विता।
मुखेनाच्छाद्य ब्रह्मास्यं तया संवेष्टितः प्रभुः॥
डाकिनी ह्यत्र वसति द्वारपाली सयष्टिका।
यः साधकोऽत्र रमते स दिव्यो नैव मानुषः" ॥

इति सम्मोहनतन्त्रम्॥ (अस्याः पर्य्याया यथा, हठयोगदीपिकायाम्। ३।१०४॥ कुटिलाङ्गी २ कुण्डलिनी ३ भुजङ्गी ४ शक्तिः ५ ईश्वरी ६ अरुन्धती ७॥) गुडूची। काञ्चनवृक्षः। इति मेदिनी। (अस्याः पर्य्याया यथा,—

"कोविदारश्चमरिकः कुद्दालो युगपत्रकः।
कुण्डलीताम्रपुष्पश्च स्मन्तकः स्वल्पकेशरी" ॥

इति भावप्रकाशस्य पूर्व्वखण्डे १ भागे॥) कपिकच्छुः। सर्पिणीवृक्षः। इति राजनिर्घण्टः॥

कुण्डली, [न्] पुं, (कुण्डलं अस्त्यस्य इति इनिः। कुण्डलाकारेण स्थितेरस्य तथात्वम्।) सर्पः। इत्यमरः।१।८।७॥ वरुणः। (कुण्डलं कुण्डलवदाकारं शरीरे अस्त्यस्य।) मयूरः। इति मेदिनी॥ चित्तलमृगः। इत्यजयपालः। (विष्णुः। यथा, महाभारते १३।१४९।११०।

"अरौद्रः कुण्डली चक्री विक्रम्यूर्ज्जितशासनः" ॥)

कुण्डलयुक्ते, त्रि। इति मेदिनी। (यथा गोः रामायणे। ३।९।११।

"इमे च पुरुषा दिव्या यान्त्यस्य रथमन्तिकात्।
परं शुभाः कुण्डलिनो युवानः खड्गपाणयः" ॥)

कुण्डाशी, [न्] त्रि, (कुण्डं योनिकुण्डं तदुपलक्षीकृत्य अश्नाति जीवनयात्रां यापयतीति। कुण्ड+अश्+णिनिः।) भगभक्षकः। कोट्ना इति भाषा। इति महाभारते दानधर्म्मः। (कुण्डस्य जारजातस्य अन्नं अश्नातीति।) कुण्डान्नभोजी। तस्य नरको यथा,—

"रङ्गोपजीवी कैवर्त्तः कुण्डाशी गरदस्तथा।
सूची माहिषकश्चैव पर्व्वकारी च यो द्विजः॥
आगारदाही मित्रघ्नः शाकुनिर्ग्रामयाजकः।
रुधिरान्धे पतन्त्येते सोमं विक्रीणते च ये" ॥

इति विष्णुपुराणे।२। ६।२०,२१॥ "रङ्गोपजीवी नटमल्लादिवृत्तिः। कैवर्त्तः धीवरवृत्तिः पत्यौ जीवति जाराज्जातः कुण्डः तदन्नभोजी कुण्डाशी। सूची पिशुनः। माहिषो महिषोपजीवी। यद्वा।

'महिषीत्युच्यते भार्य्याभगेनोपार्ज्जितं धनम्।
उपजीवति यस्तस्याः स वै माहिषकः स्मृतः'॥

इति स्मृतिप्रोक्तः। पर्व्वकारी धनादिलोभेनापर्व्वसु अमावस्यादिक्रियाप्रवर्त्तकः। पर्व्वगामीति पाठे पर्व्वसु स्त्रीगामी। शाकुनिः पक्षिजीवी। शुभनिमित्तशकुनोपजीवी वा। ग्रामयाजकः ग्रामार्थे यज्वा।" इति तट्टीकायां श्रीधरस्वामी॥ (धृतराष्ट्रपुत्त्रः। यथा महाभारते।१।११७।१३।

"कुण्डाशी विरजाश्चैव दुःशला च शताधिका" ॥)

कुण्डिका, स्त्री, (कुण्ड+स्वार्थे कन् टाप् अत इत्वं च।) कमण्डलुः। इति हेमचन्द्रः॥ पिठरः। इति शब्दचन्द्रिका। कुँड़ि इति भाषा॥ (ताम्रकुण्डम्। स्थाली। सामवेदान्तर्गत उपनिषद्विशेषः। यथा, मुक्तिकोपनिषदि।

"अव्यक्तैकाक्षरं पूर्णा सूर्य्याद्यध्यात्मकुण्डिका" ॥)

कुण्डिनं, क्ली, विदर्भनगरम्। इति हेमचन्द्रः। (यथा, हरिवंशे।

"कुण्डिने पुण्डरीकाक्ष! भोजपुत्त्रस्य शासनात्" ॥)

कुण्डिनः, पुं, (कुडि रक्षायां दाहे च "वञ्जलमन्यापि"। उणां।२।४९। इति इनच्।) मुनिविशेषः। इत्युणादिकोषः। (यथा, आश्वलायने।

"कुण्डिनानां वाशिष्ठमैत्रावरुणकौण्डिन्येति" ॥

कुरुवंशीयनृपभेदः। स च धृतराष्ट्रस्य पुत्त्रः। यथा महाभारते १।९४।५६।

"हस्ती वितर्कः क्राथश्च कुण्डिनश्चापि पञ्चमः" ॥)

कुण्डी, स्त्री, (कुड़ि+इन्। ततो वा ङीप्। कुण्ड+संज्ञायां वा ङीष्।) कमण्डलुः। इत्यमरः।२।७।४६॥ स्थाली। इत्यमरटीकायां भरतः॥

कुण्डीरः, पुं, (कुण्ड्यते दह्यते संसारानलसन्तापेन। कुड़ि+ईरन्।) मनुष्यः। (कुण्ड्यते रक्ष्यते दुर्ब्बलो येन।) बलवति त्रि। इति धरणी॥

कुत् आस्तृतौ। सौत्रधातुरयम्। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्।) कुतपः। इति दुर्गादासः॥ कुत् अपस्यः कुतपः कालविशेषः। कृत्तिरचितस्नेहपात्रञ्च। इति केचित्॥

कुतः, [स्] व्य, प्रश्नः। पञ्चम्यर्थः। निह्नवः। इति विश्वः। (यथा, विष्णुपुराणे।१।१९।३७।

"सर्व्वभूतात्मके तात! जगन्नाथे जगन्मये।
परमात्मनि गोविन्दे मित्रामित्रकथा कुतः" ॥)

कुतनुः, पुं, (कुत्सिता तनुर्यस्य। पिङ्गलनेत्रत्वात् तथात्वम्।) कुवेरः। इति त्रिकाण्डशेषः॥ (त्रि, कुत्सितशरीरः। इति व्युत्पत्तिलब्धोऽर्थः॥)

कुतपः, पुं क्ली, अह्नोऽष्टमोऽंशः। दिवसस्याष्टमो मुहूर्त्तः। यथा,—

"अह्नो मुहूर्त्ता विख्याता दश पञ्च च सर्व्वदा।
तत्राष्टमो मुहूर्त्तो यः स कालः कुतपः स्मृतः" ॥

इति श्राद्धतत्त्वे मत्स्यपुराणवचनम्॥ *॥ पारिभाषिककुतपा यथा,—

"मध्याह्नः खड्गपात्रञ्च तथा नेपालकम्बलः।
रौप्यं दर्भास्तिला गावो दौहित्रश्चाष्टमः स्मृतः॥
पापं कुत्सितमित्याहुस्तस्य सन्तापकारिणः।
अष्टावेते यतस्तस्मात् कुतपा इति विश्रुताः" ॥

इति मिताक्षरायामाचाराध्यायः॥ स च त्रिंशद्दण्डदिनमाने द्वितीयप्रहरशेषदण्डावधि तृतीयप्रहरप्रथमदण्डपर्य्यन्तकालः। इत्यमरः।२।७।३१॥ स तु एकोद्दिष्टश्राद्धारम्भकालः। यथा,—

"आरभ्य कुतपे श्राद्धं कुर्य्यादारौहिणं बुधः।
विधिज्ञो विधिमास्थाय रौहिणन्तु न लङ्घयेत्" ॥

इति श्राद्धतत्त्वम्॥

"दिवसस्याष्टमे भागे मन्दीभवति भास्करः।
स कालः कुतपो ज्ञेयः पितॄणामन्नमक्षयम्" ॥

इति शातातपः॥ *॥ दौहित्रः। वाद्यम्। छागलोमजकम्बलम्। कुशतृणम्। इति मेदिनी॥

कुतपः, पुं, (कुत्सितं पापं तपति कुं भूमिं तपति वा। तप+अच्। कुत्+कपन् वा।) सूर्य्यः। वैश्वानरः। द्विजन्मा। अतिथिः। गौः। भागिनेयः। इति हेमचन्द्रः॥

कुतुकं, क्ली, (कुत्+बाहुलकात् उकञ्।) कौतुकम्। इत्यमरः।१।७।३१॥ (यथा, गुमानिकविकृतोपदेशशतके।१०२।

"कुतुकाय कोविदानां मूढ़मतीनां महोपकाराय।